# tiruppAvai shlokAH with avatArikA

# તિરુપ્પાવૈ શ્લોકાઃ અવતારિકાસહિતાઃ

## Document Information

Text title : tiruppAvai

File name : tiruppAvai.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Shri Andal (Sanskit translation by S. N. Sriramadesikan)

Transliterated by : B Sreenivas bsmaachu at yahoo.com

Proofread by : B Sreenivas bsmaachu at yahoo.com

Description-comments : Sanskit translation by S. N. Sriramadesikan, Shiromani

Latest update : January 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# tiruppAvai shlokAH with avatArikA

# તિરુપ્પાવૈ શ્લોકાઃ અવતારિકાસહિતાઃ

SHRI ANDAL's TIRUPPAVAI

Sanskrit Slokas

Author: S. N. Ramadesikan. (Siromani)

P R E F A C E

TIRUPPAVAI which consists of 30 songs is a small lyric, an expression of intense love for the Lord, by Shri Andal, one of the ten Vaishnavite saints of South India. Though it, has been translated into English, the need for a translation in Sanskrit, the language of the philosophy and religion of India, was felt very much, since such translation will make the non-Tamil knowing people understand the exquisite sweetness of the lyric and derive pleasure and profit by a daily chanting of it as the Tamil-knowing Shri Vaishnavas do. This versified translation of Tiruppavai first appeared in l942, in a monthly Journal called "Desika Shri Sukti Samrakshani" published in Madras, together with an introduction in sixteen Sanskrit verses containing a short account of the origin of Tiruppavai and the life of Shri Andal.

The merit of this small work is borne out by the foreword and introductions by such eminent persons as Dr. B. Ramakrishna Rao-who is a poet himself both in Sanskrit and Telugu, who has translated Shri Jagannatha Pandita 's five laharis in Telugu poems, who is a Navabhasha Pandita and who has dived deep in the Visishtadvaita literature, Shri V. V. Giri-a born-leader,

whose head and heart are noted for clarity and compassion, Shri M.Patanjali Sastriar-a great scholar in Sanskrit, the President of the Central Sanskrit Board, and retired Chief Justice of the Supreme Court of India, and Tarkarnava Pandita Ratna Shri Uttamur T. Viraraghavacharya whose profound scholarship in the Sastras has been recognised by the Central Government through the Presidential award in 1959, and under whom I studied the Nyaya Sastras.

I expresss my sincere thanks to all of them. I shall certainly deem my labour of love fully recompensed if the large circle of people for whose benefit this lyric has been prepared, read it and imbibe the spirit of Shri Andal.

S.N. SRIRAMADESIKAN.
25, Burkit Road, T. Nagar, Madras.
29-5-196l.

Shri M. PATANJALI SASTRI,
Chairman, Central Sanskrit Board,
Krishna Vihar,
Luz, Mylapore, Madras, May 23, 1961.

The rendering in Sanskrit verse of the inspired outpourings of Shri Andal in the celebrated Tamil lyric Tiruppavai is a venturesome undertaking, but Pandit Shrirama Desikan has carried it through with notable success.

Using the Sragdhara and Sardoola Vikriditam metres, the longest known to Sanskrit prosody, the Pandit has becn able to compress each pasuram of the poem within the framework of a single sloka, but not without squeezing out in the process some of the ideas here and there in the poem (e.g. pasurams 28 and 29). Such instances are, however, few, and, on the whole, the stanzas written in elegant and flowing Sanskrit keep commendably close

to the original. The Avatarika (also in verse) gives a brief account of Shri Andal and her manobhava in composing the poem. I congratulate the Pandit on his fine performance.

-M. PATANJALI SASTRI.

Tarkarnava Pandita Ratna Shri Uttamaur T. Viraraghavacharya,
(Holder of the President’s Award in Sanskrit)
25, Nathamuni Street, T. Nagar, MADRAS-7.

I have gone through Pandit Shri Rama Desikan’s Sanskrit, Tiruppavai verses. The well known Tamil Divya Prabandha named Tiruppavai by the Great Andal Devi has been rendered into Sanskrit by Shri Rama Desikan, who has studied under me the whole Nyaya Siromani Course when I was the Senior Nyaya Professor in the Tirupati Venkateswara Sanskrit College. He passed his Nyaya, Siromani Examination in 1942. He has diligently studied the Nyya Sastra for four years and got some awards during his studentship. He possesses the teaching capacity in Nyaya and other subjects like Sahitya. He has studied Vedanta and written some articles in Sanskrit and Tamil. He has translated into Tamil some Sanskrit works also. His ability to speak fluently and to write verses in Sanskrit will be appreciated by every Sanskrit lover. This Sanskrit translation of the “Thiruppavai Prabandha" will clearly show his profound knowledge in Sahitya. His knowledge in Nyaya Sastra, his character, and his endeavour to study the Nyaya works critically and to analyse the facts stated in them are to be appreciated. He deserves all encouragement.

-T. Viraraghavacharya

FOREWORD BY

Dr. B. Ramakrishna Rao,
(Governor of Uttar Pradesh )

I am exceedingly happy to introduce this translation into Sanskrit of the exquisite poem “Thiruppavai" by Shri S.N. Shrirama Desikachari of Madras. “Thiruppavai" is a famous devotional poem composed by Andal, otherwise known as Godadevi, who was the foster-daughter of Shri Vishnuchittar or Perialwar, who is one of the famous twelve Shrivaishnava Saints called Alwars in the South. The Alwars and the Nayanmars have been famous Vaishnavaite and Shaivite saints in the South who were responsible for propagating the bhakti cult, which has made the people intensely devotional in their lives. The large number of temples in the South and the millions of people who are devoted to worship in the temples, their maintenance, construction, improvement etc., is an eloquent testimony to the background of the Bhakti Cult, which is popular throughout India, but particularly so in the South.

Andal is supposed to have been found by her foster-father in a Tulasi-garden which he had reared for making mAlAs for the worship of Vatapatra Shayi, the deity at Shri Villiputtur near Tenkasi. Shri Vishnuchittar brought up Andal like his own daughter, and reared in that devotional atmosphere, she grew up into beautiful womanhood coupled with a sense of devotion, which only reminds us of the great woman-saint, of Rajasthan, Mirabai. Vishnuchittar used to offer tulasi and flower garlands to the Deit every evening for worship. Young Andal used to adorn herself with the flower garlands daily lefore they were taken to the temple for offering without the knowledge of her father. She set to put them on and delight herself by looking into the glass and admiring her own beauty. She was once detected by her father with the garlands on her and looking into the glass. Vishnuchittar was naturally upset and did not take those garlands for offering. The Lord Vatapatrashayi appeared in the

dream of Vishnuchittar that night, and was cross with him that flower garlands were not offered to Him as usual. Vishnachittar with folded hands excused himself by pointing out that they were not offered because they had been polluted by being worn by his daughter. The reply of the lord was that it was that very garland which he loved and that if only garlands worn by Andal were offered he would accept them and not otherwise. This miraculous dream resulted in the recognition by Vishnuchittar of Andal's greatness as a devotee and saintliness. It is believed that ultimately Andal who insisted on getting married only to the Lord Himself, became identified with Ranganatha, the Deity at Shrirangam. The temples of Shri Vatapatra-shayi and Andal are situated in Shri Villiputtur and the custom of sending flower garlands worn by Andal to the Deity of Vatapatrashayi temple, still continues to this day. This legend is one of the many which are characteristic of the bhakti cult and the particular form of upasana which is followed by devotees belonging to the Shrivaishnava Sampradaya of Shri Ramanuja.

This book "Thiruppavai" is a collection of thirty devotional songs said to have been composed by Andal. The songs celebrate the festival of Dhanurmasa, which is held every year in the month of Margashirsha, which has been declared by Shri Krishna to be a favourite with him in the Geetha. Masanan Margashirashomi is what Shri Krishna says and this month is devoted to early rising and worship of the Lord in a form which is peculiar to Shrivaishnavas. Men and women, particularly women, are anxious to rise very early, have their ablutions and bath and engage themselves in a vrata which seems to have been performed by the Gopis in order to win the affection of Lord Krishna. In this poem which is recited one on every day during this month by Shrivaishnava devotees, Andal exhorts the

Gopis and other women to rise early, do their duties and join in the worship of the Lord and win His affection. The poems are exquisite in their sweet Tamil and can compare with the best of devotional songs in any literature. The homely sentiments expressed in the Pashurams or stanzas and the beautiful language in which they are expressed constitute a true representation of what is called anuragabhakti or devotion in the relationship of divine love. This lovely poem has been translated into Telugu and English and probably into other languages. An attempt has been made by Shriramadesikachari to clothe it in simple Sanskrit, which is very faithful to the original Tamil composition. The author is a well-known Sanskrit Pandit, who has been serving the cause of Sanskrit learning for some yoars. He is a fluent, speaker in Sanskrit and has to his credit some compositions both in Telugu which is his mother-tongue and also in Sanskrit. He has translated many Sanskrit dramas like Mudrarakshasam, Avimarakam, Malathi-Madhavam etc., into Tamil. He has also published many articles in Tamil on Sanskrit writers and Sanskrit literature. As the Secretary of the South Indian Sanskrit Pandits Association for six years, he conducted many conferences and public meetings and organized free Sanskrit, classes for its propagation. I am glad that, Tiruppavai has been translated by him into Sanskrit. I gladly introduce this beautiful poem to readers outside Tamilnad and I do hope that it will rouse interest among lovers of Sanskrit in other languages of the South like Tamil, which has an inexhaustible store of great literature.

B. Ramakrishna Rao
Governor’s Camp,UTTAR PRADESH.

April 24, 1961

Shri V. V. GIRI.

Governor of Kerala
Kerala Governor's Camp,
MADRAS.

19th April, 196l.

I am very happy to receive a presentation of the Sanskrit version of the poems written by Andal (Tiruppavai) and these thirty poems are a very valuble contribution to Tamil Literature. Shri Sreerama Desikan's rendering of these poem into Sanskrit will help the whole of India to know the significance and the spirit underlying these poems and he has done a distinct service to that great Andal in getting these circulated throughout India in Sanskrit. Shri Sreerama Desikan is a Sanskrit scholar of very great eminence and he is a Nyaya, Siromani of the Madras University. He is a gentleman of character, integrity, ability and knowledge. I wish him every success in his trying to render his humble service to the country.

V. V. Giri.

श्रीरस्तु
श्रीनिवासपरब्रह्मणे नमः ।
श्रीगोदादेवीविरचित
तिरुप्पावै - पद्यानां संस्कृतश्लोकाः

अवतारिका

વૈકુણ્ઠે રમયા સાકં કદાચિજ્જગતીપતિઃ ।
સંસારસાગરે મગ્નાન્ જનાન્ સ્મૃત્વા વ્યચિન્તયત્ ॥ ૧॥

અહો મોહવશાદેતે સાગરાન્તર્નિમજ્જિતાઃ ।
યયા કયાઽપિ વિધયાપ્યુદ્ધરિષ્યામિ તાન્ ધ્રુવમ્ ॥ ૨॥

એવં સઞ્ચિન્ત્ય ભગવાન્ વૈષ્ણવાગ્રેસરાન્ બહૂન્ ।
સસર્જ નૌસમાનાંસ્તાન્ આલ્વાર્-શબ્દાભિધાન્ ગુરૂન્ ॥ ૩॥

એતેષ્વન્યતમઃ સત્ત્વશીલાદ્યૈસ્સમલઙ્કૃતઃ ।
વિષ્ણુચિત્તાભિધો વિષ્ણુકુલદીપ ઇવોત્થિતઃ ॥ ૪॥

આસીદ્ભગવતો ધન્વિપુરેશસ્ય પદામ્બુજે ।
કુર્વન્ હિ તુલસીપત્રમઞ્જર્યાદ્યૈઃ સમર્ચનામ્ ॥ ૫॥

તુલસીભૂમિખનનવેળાયાં પેટિકાગતા ।
એકદા બાલિકા લબ્ધા વિષ્ણુભક્તશિખામણેઃ ॥ ૬॥

દિને દિને સ્વચ્છપક્ષકલેવ શશિનઃ શુભા ।
વવૃધે યૌવનં ચાપિ તસ્યાઃ પ્રાદુરભૂદ્દ્વયઃ ॥ ૭॥

સર્વદા ભગવન્તં તં રઙ્ગનાથાહ્વયં પ્રભુમ્ ।
સ્વસ્ય ભર્તારમાચિન્ત્ય તદ્વ્યગ્રા સમભૂત્સદા ॥ ૮॥

અનાવૃષ્ટિરભૂદ્વૃન્દાવને કૃષ્ણાપચારતઃ ।
પૂર્વમેતત્સમાલોચ્ય કર્તું કાત્યાયનીવ્રતમ્ ॥ ૯॥

ઐહન્ત હન્ત તા ગોપ્યઃ સાધ્યં ત્રિંશદ્દિનૈઃ શુભમ્ ।
પ્રાર્થયન્તે સ્મ તં કૃષ્ણં વ્રતોપકરણં પ્રતિ ॥ ૧૦॥

અઙ્ગીકૃત્ય તદીયાં તાં પ્રાર્થનાં સફલાં વ્યધાત્ ।
કૃષ્ણઃ કમલપત્રાક્ષો ભક્તાનામભયપ્રદઃ ॥ ૧૧॥

તતસ્તાઃ સઙ્ગતાઃ સ્વાસુ નિયમં પર્યકલ્પયન્ ।
યા પૂર્વં પ્રાતરુત્તિષ્ઠેત્પ્રબોધયતુ સાપરાઃ ॥ ૧૨॥

ઇત્થં વિધાય નિયમં તથૈવ પ્રાતરુત્થિતાઃ ।
યમુનાયાં સુખં સ્નાત્વા ચક્રિરે વ્રતમુત્તમમ્ ॥ ૧૩॥

પૂર્ણિમાયાં માર્ગશીર્ષમાસિ પુણ્યદિને શુભે ।
આખ્યાયિકામિમાં કૃત્સ્નાં સ્મરન્તી મનસા સતી ॥ ૧૪॥

ગોપિકાભિઃ કૃતં સર્વં કાર્યજાતં ત્વમન્યત ।
સ્વેનૈવ ક્રિયમાણં સા ગોદા સર્વાઙ્ગસુન્દરી ॥ ૧૫॥

મત્વા તથૈવ સા ગોદા પ્રોવાચેમાં કથાં સ્મૃતામ્ ।
ત્રિંશતા રસપૂર્ણાભિઃ દિવ્યૈર્દ્રમિડસૂક્તિભિઃ ॥ ૧૬॥

અથ તિરુપ્પાવૈ શ્લોકાઃ ।

યા સ્વયં ભટ્ટનાથસ્ય સીતેવ મિથિલેશિતુઃ ।

લબ્ધાઽભિવર્ધિતા ચૈવ તાં ગોદાં સ્મર હે મનઃ ॥

ગોપિકાસ્વન્યતમા ઉષસ્યુત્થાય વ્રતાનુષ્ઠાનકાલં વર્ણયન્તી
અન્યાઃ પ્રબોધયતિ - માર્ગળિત્તિઙ્ગળ્ - ઇતિ ।
માસોઽયં માર્ગશીર્ષો દિનમપિ સુદિનં ચન્દ્રસમ્પૂરિતત્વાત્
તસ્માદુત્થાય ગોપ્યઃ શુભતરવપુષઃ સ્નાતુકામાઃ પ્રયાત ।
યઃ સર્વાન્ શત્રુવર્ગાન્ તૃણમિવ મનુતે તસ્ય ગોપસ્ય પુત્રઃ
કૃષ્ણઃ પદ્માયતાક્ષો દિશતિ ચ કરણાન્યસ્મદભ્યર્થિતાનિ ॥ ૧॥

વ્રતાપેક્ષિતનિયમાનાહ કાચિદ્ગોપિકા - વૈયત્તુ વાળ્વીર્કાળ્ - ઇતિ
હે ભૂલોકમવાપ્ય નઃ શૃણુત સદ્ગોપ્યો લસન્ત્યો ભૃશં
વાક્યં મઙ્ગલદાયકં વ્રતપરં તત્રોપયુક્તાન્ વિધીન્ ।
નાસ્માભિર્વિમુખીભિરર્થિનિવહે ભાવ્યં પ્રસૂનાઞ્જને
ધાર્યે નૈવ કુપુસ્તકાદિપઠનં ત્યાજ્યં હ્યકૃત્યં તથા ॥ ૨॥

વ્રતાનુષ્ઠાનસ્ય ફલં બ્રૂતે - ઓઙ્ગિ ઉલગલન્દ - ઇતિ ।
પાદાક્રાન્તસમસ્તલોકવિભવં સ્તુત્વા પ્રભું શ્રીધરં
સ્નાનં ચેત્ક્રિયતે વ્રતાય સકલો લોકો વિબાધો ભૃશમ્ ।
ગાવોઽભીષ્ટપયઃપ્રદાઃ કિલ મહી સસ્યૈઃ સમૃદ્ધા ભવેત્
દેવો વર્ષતિ માસિ માસિ ચ જનાઃ નિત્યશ્રિયં પ્રાપ્નુયુઃ ॥ ૩॥

ગોપ્યઃ વર્ષકર્તારં પર્જન્યદેવં પ્રાર્થયન્તે - આળિ મળૈક્કણ્ણા - ઇતિ ।
હે પર્જન્ય સમુદ્રમેત્ય સલિલં પીત્વા સમૃદ્ધં તતો
ભૂત્વા નીલતનુર્યથાઽઽદિપુરુષઃ શ્રીચક્રપાણેઃ કરે ।
શઙ્ખધ્માનસમાનગર્જનયુતસ્ત્વં વર્ષ વારાં ચયં
સ્નાત્વા તત્ર સમાપ્ય સુવ્રતમિદં તુષ્ટા ભવામો વયમ્ ॥ ૪॥

ભગવન્નામસ્મરણસ્ય દુરિતનિવર્તકત્વમાહ - માયનૈ મન્નુ - ઇતિ ।
યં માયાવિનમામનન્તિ વિવુધાઃ યં માથુરં જાનતે
યં પ્રાહુર્યમુનાવિહારકુશલં દામોદરં કેશવમ્ ।
તં દેવં મનસા સ્મરેમ વચસા સઙ્કીર્તયામો યદિ
હ્યગ્નૌ તૂલમિવાખિલં કૃતમઘં નશ્યેદ્ભવિષ્યચ્ચ નઃ ॥ ૫॥

કાચિદ્ગોપિકા અપરામુદ્બોધયતિ - પુળ્ળું સિલમ્બિન કાણ્ - ઇતિ ।
બાલે ત્વં ન શૃણોષિ કિં ખગરુતાન્યાહ્વાનશઙ્ખધ્વનિઃ
નૈવ શ્રોત્રપથં ગતોઽસ્તિ ગરુડાધીશાલયાજ્જાગૃહિ ।

ધ્યાનાવસ્થિતતદ્ગતેન મનસા સઙ્કીર્તયદ્ભિર્હરિં
    શબ્દાનુચ્ચરિતાન્ મહાજનગણૈઃ શ્રુત્વાપિ નોદ્બુધ્યસે ॥ ૬॥

અન્યાં કાચ્ચિદુત્થાપયતિ - કીચુ કીચુ - ઇતિ ।

ભ્રાન્તે ખઞ્જનસઙ્ગજાતનિનદાન્ ત્વં કીચુકીચીત્યમૂન્
    ગોપ્યઃ સુન્દરકેશપાશભરિતા માઙ્ગલ્યમાલાવૃતાઃ ।
યન્મથ્નન્તિ દધીહ તેન જનિતાન્ શબ્દાંશ્ચ યત્કેશવં
    બ્રૂમસ્તદ્ભવતી ન કિં નિશમયત્યુત્તિષ્ઠ બાલે શુભે ॥ ૭॥

એકા અપરાં પ્રબોધયતિ - કીળ્વાનમ્ - ઇતિ ।

દૃષ્ટ્વા પ્રાચ્યાં પ્રકાશં તદનુ યદુવરૈર્મુચ્યમાના મહિષ્યઃ
    ધાવન્ત્યેકત્ર તુષ્ટાઃ તૃણચરણધિયા નૈવ વર્તામહેઽત્ર ।
ઇત્યેવં બદ્ધકોપાઃ જ્વલદનલસમાઃ સ્થાપયિત્વૈવ ગોપીઃ
    પ્રાપ્તાઃ સ્મસ્ત્વાં હિ નેતું બકમુખશમનં કૃષ્ણમુચ્ચૈઃ સ્તુવન્ત્યઃ ॥ ૮॥

ગોપિકાસ્વન્યતમા અપરાં ગોપિકાં ઉદ્બોધયતિ - તૂમણિ માટત્તુ - ઇતિ ।

પર્યઙ્કે બહુરત્નદીપભરિતે ધૂપૈસ્તથા વ્યાપૃતે
    નિદ્રાસિ હ્યબલે કવાટયુગલં ત્વં ક્ષિપ્રમુદ્ઘાટય ।
મૂકા કિં બધિરાલસા તવ સુતા સ્વાપાભિચારં ગતા
    કિં વા કીર્તય માયિનં હરિમિમાં ક્ષિપ્રં ત્વમુત્થાપય ॥ ૯॥

ગોપિકામેકાં અપરા પ્રબોધયતિ - નોટ્રુ સ્વર્ગમ્ - ઇતિ ।

અસ્માકં પટહપ્રદેન તુલસીયુઙ્મૌલિના શાર્ઙ્ગિણા
    ધ્વસ્તો રાવણસોદરઃ સ વિજિતો નિદ્રાપરીક્ષાવિધૌ ।
ચિહ્નં સ્વીયપરાજયસ્ય મહતીં નિદ્રામદાત્કિં નુ તે
    યેન ત્વં સ્વપિષીદૃશં બહુવિધં સમ્બોધ્યમાના મુહુઃ ॥ ૧૦॥

ગાઢનિદ્રાસુખમનુભવન્તીં અન્યાં ગોપીં ઉત્થાપયતિ - કટ્રુક્કરવૈ - ઇતિ ।

સમ્પન્નસ્ય ચ શત્રુનાશનવિધૌ દીક્ષાજુષઃ પુત્રિકે
    વલ્મીકાગ્રફણાધરપ્રવિલસન્મધ્યે મયૂરીનિભે ।
સખ્યસ્તે સમુપાગતા જલધરચ્છાયં ભજન્ત્યો હરિં
    નોત્તિષ્ઠસ્યપિ મૂકભાવસહિતા કિં મન્યસે નિદ્રયા ॥ ૧૧॥

અન્યાં કાચ્ચિત્ ગોપિકાં ઉત્થાપયતિ - કનૈત્તિળમ્ - ઇતિ ।

બદ્ધૈર્વત્સપરાયણૈઃ સુમહિષીવૃન્દૈઃ પયઃ ક્ષારણા-
    દાસિક્તાઙ્ગણભુમિસદ્ગૃહપતેર્ગોપેશ્વરસ્ય સ્વસઃ ।

ગેહદ્વારસમાગતૈર્હિમજલાસિક્તસ્વશીર્ષૈઃ સખી-
    વૃન્દૈઃ સંસ્તુતરાવણારિવિભવં શ્રુત્વાપિ નોદ્બુધ્યસે ॥ ૧૨॥

    એકાં ગોપિકાં પ્રબોધયતિ - પુળ્ળિન્ વાય્ - ઇતિ ।
વિષ્ણું ઘોરબકાસ્યદારકમમું રક્ષઃશિરશ્છેદિનં
    ગાયન્ત્યઃ પ્રતિપેદિરે વ્રતભુવં સર્વાશ્ચ ગોપાઙ્ગનાઃ ।
શુક્રઃ પ્રાદુરભૂદ્બૃહસ્પતિરગાદસ્તં દ્વિજાશ્ચોત્થિતાઃ
    બાલે ત્વીદૃશકાલ એવ શયિતા સ્નાનં હ્યકૃત્વા શુભે ॥ ૧૩॥

    પ્રભાતલક્ષણં વર્ણયન્તી કાઞ્ચિદ્ગોપિકામુદ્બોધયતિ - ઉઙ્ગળ્ પુળક્કડૈ - ઇતિ ।
ગેહારામગવાપિકાજલગતં રક્તોત્પલં પુષ્પિતં
    ભ્રાન્તે સઙ્કુચિતાઽભવત્કુમુદિની ધ્માયન્તિ શઙ્ખં જનાઃ ।
શ્વઃ પ્રાતઃ પ્રથમોત્થિતા નનુ સખીરુદ્બોધયિષ્યેઽહ મિ-
    ત્યુક્તિઃ કિં તવ નૈવ લજ્જયતિ તત્પ્રોત્થાય કૃષ્ણં ભજ ॥ ૧૪॥

    અપરાં ગોપિકામુત્થાપયતિ - એલ્લે ઇળઙ્ગિળિયે - ઇતિ ।
અદ્યાપિ સ્વપિષીહ બાલશુકિસખ્યદ્ય પ્રબુદ્ધાસ્મ્યહં
    જાનેઽહં તવ વાક્યકૌશલમહં યૂયં તથા દ્રક્ષ્યથ ।
કિં સર્વાઃ સમુપાગમન્ ? નનુ તથા સઙ્ખ્યાય જાનીહિ તત્
    ત્વં તં માયિનમુગ્રશત્રુશમનં કૃષ્ણં સખાયં સ્મર ॥ ૧૫॥

    એતાવતા સર્વાઃ ઉદ્બુધ્ય સમ્પ્રતિ નન્દગોપસ્ય ગૃહદ્વારમાગતવત્યઃ
   પ્રથમં દૌવારિકં યાચન્તે - નાયકનાય્ નિન્ર્ - ઇતિ ।
શ્રીમદ્ગોપજનેશિતુર્ગૃહપરિત્રાતસ્તથોચ્ચધ્વજ-
    પ્રાલમ્બોજ્જ્વલતોરણપ્રગુણિતદ્વારસ્થ દૌવારિક ।
કૃષ્ણઃ પ્રાગવદદ્વ્રતોપકરણં દાસ્યામિ યુષ્મભ્યમિ-
    ત્યાપ્તાઃ સેવિતુમેવ તં મણિમયં તસ્માત્કવાટં નુદ ॥ ૧૬॥

    નન્દાદીનુદ્બોધયન્તિ - અમ્બરમે તણ્ણીરે - ઇતિ ।
સ્વામિન્ દાનપરાયણ પ્રભુવર પ્રોત્તિષ્ઠ નન્દપ્રભો
    સ્વામિન્યુત્તમવંશજે શુભગુણે નિદ્રં યશોદે ત્યજ ।
વ્યાપ્ય વ્યોમ પદત્રયેણ તુ જગન્માતઃ પ્રબુધ્યસ્વ હે
    વિષ્ણો ત્વં બલભદ્ર કૃષ્ણસહિતશ્ચોત્તિષ્ઠ કૃષ્ણપ્રિય ॥ ૧૭॥

    પુરુષકારભૂતાં નીલામુદ્બોધયન્તિ - ઉન્દુ મદકળિટ્રન્ - ઇતિ ।
નીલે વાસિતચારુકેશનિચયે હે નન્દગોપસ્નુષે

કૂજન્ત્યત્ર ચ કુક્કુટા અપિ કુહૂકણ્ઠા લતામણ્ટપે ।
અસ્મત્કીર્તિતકૃષ્ણનામવિભવં ભક્ત્યા સ્વયં શ઼ૃણ્વતી
ભૂષાશિઞ્જિતમઞ્જુપાણિકમલેનોદ્ઘાટયસ્વાર્ગલમ્ ॥ ૧૮॥

નીલાદેવીં પુરસ્કૃત્ય કૃષ્ણપરમાત્માનમુત્થાપયન્તિ - કુત્તુ વિળક્કેરિય - ઇતિ ।
પર્યઙ્કે બહુદીપરાજિલસિતે કાન્તાકુચાગ્રસ્થલી-
વિન્યસ્તાત્મભુજાન્તરાલ ભગવન્ વાચં ન દત્સે હિ નઃ ।
દેવિ ત્વં ન કિલેચ્છસિ સ્વશયનાત્કાન્તં કદાપ્યુત્થિતં
ત્વં ચેન્ન ક્ષણવિપ્રયોગસહના તત્ત્વં ન તન્નો દયા ॥ ૧૯॥

શ્રિયઃપતિં કૃષ્ણપરમાત્માનં ગોપિકાઃ પ્રબોધયન્તિ - મુપ્પત્તુમૂવર્ - ઇતિ ।
ત્રિંશત્કોટિદિવૌકસામપિ પુરો ગત્વા તદાર્તિચ્છિદા-
કારિન્નાશ્રિતવત્સલારિશમનોત્તિષ્ઠ સ્વયં નિર્મલ ।
નીલે વિદ્રુમરક્તવર્ણવદને કુમ્ભસ્તનિ ત્વં હિ નઃ
કૃષ્ણં ચાન્યદપેક્ષિતં ચ કરણં દત્વા વ્રતં કારય ॥ ૨૦॥

કૃષ્ણપરમાત્માનં ગોપિકાઃ પ્રબોધયન્તિ - એટ્ર કલઙ્ગળ્ - ઇતિ ।
આપૂર્ય પ્રસૃતાન્ ઘટાન્ બહુપયોધારા બહિર્મુઞ્ચતઃ
સ્વામી ધેનુગણસ્ય યોઽતિમહતો ગોપસ્ય તસ્યાત્મજ ।
દીનાસ્ત્યક્તપરાક્રમારિસદૃશાસ્ત્વત્પાદપદ્માન્તિકં
પ્રાપ્તાઃ સ્મઃ શ્રિતપાલનોદ્યત જગદ્દીપ પ્રબુધ્યસ્વ ભો ॥ ૨૧॥

એતાવતા ભગવન્તમુત્થાપ્ય સમ્પ્રતિ તત્કટાક્ષાન્ પ્રાર્થયન્તે -આઙ્ગણ્ મા ગ્નાલત્તુ-ઇતિ ।
નષ્ટાહઙ્કૃતિશત્રુસઙ્ઘવદિહાગત્ય સ્થિતાનામુપર્ય-
સ્માકં ન પતેયુરબ્જ રુચયઃ કિં તે કટાક્ષાઃ શનૈઃ ।
અક્ષિભ્યામુદિતાર્કચન્દ્રસદૃશત્વિઙ્ભ્યાં મનાક્ ચેદ્ભવા-
નસ્માન્ પશ્યતિ નષ્ટપાપનિચયાઃ સ્યામ પ્રહૃષ્ટા વયમ્ ॥ ૨૨॥

ગોપાઙ્ગનાઃ કૃષ્ણપરમાત્માને સ્વાગમનં નિવેદયન્તિ - મારિમલૈ મુળૈઞ્ચિલ્ - ઇતિ ।
ક્ષોણીભૃદ્વરકન્દરોદરશયઃ સિંહઃ પ્રબુદ્ધો યથા
દૃષ્ટ્વોગ્રં પરિધૂય કેસરચયં ચાગ્ચેદ્ગભીરાં ગતિમ્ ।
આગત્યૈવમધિષ્ઠિતઃ સુવિહિતં સિંહાસનં યત્કૃતે
પ્રાપ્તાઃ કાર્યમિદં વિચિન્ત્ય કરુણામસ્માસુ સન્દર્શય ॥ ૨૩॥

ભગવતઃ કૃષ્ણસ્ય દૃષ્ટિદોષપરિહારાય વ્રજસ્ત્રિયઃ મઙ્ગલાનિ
પ્રાર્થયન્તે -અન્રુ ઇવ્વુલગમળન્દાય્ - ઇતિ ।

લઙ્કાધીશદશાનનાદિશમન ત્વદ્વિક્રમો વર્ધતાં
    વત્સાખ્યારિવિનાશિનસ્તવ જગન્માતુઃ પ્રથેતાં પદે ।
તં ગોવર્ધનપર્વતં કૃતવતશ્છત્રં ગુણાસ્તે જય-
    ન્ત્વેતં ત્વાં શરણં ગતા વયમહો લબ્ધું વ્રતસ્યોચિતમ્ ॥ ૨૪॥

વલ્લવ્યઃ સ્વાગમનકારણં કૃષ્ણાય નિવેદયન્તિ - ઓરુત્તિ મગનાય્ - ઇતિ ।
કસ્યાશ્ચિજ્જઠરાદ્ભવન્નિશિ તદૈવાસીઃ પરસ્યાઃ સુતઃ
    તસ્યૈવં પરનાશિનો વ્યરચયત્કંસોઽપ્રિયં તે બહુ ।
તત્સર્વં ત્વયિ નિષ્ફલત્વમગમત્તસ્મિન્ ભવત્યર્થિતાં
    પ્રાપ્તાઃ સ્મઃ પટહાદિકં બહુવિધં દત્વા વ્રતં કારય ॥ ૨૫॥

ગોપિકાઃ નન્દાત્મજાત્ વ્રતસાધનાનિ પ્રાર્થયન્તે - માલે મણિવણ્ણા - ઇતિ ।
શઙ્ખાન્ શુક્લતમાન્ નિનાદભરિતાન્ દીપાન્ બહૂન્ સુન્દરાન્
    કિઞ્ચાત્યદ્ભુતનાદવાદિપટહાન્ વેદપ્રવક્તૄન્ જનાન્ ।
અત્યુચ્ચધ્વજમાવિતાનમખિલં ચાન્યદ્ધરે શ્રીપતે
    દેહિ ત્વં વટપત્રતલ્પ જલદશ્યામ પ્રભો સાદરમ્ ॥ ૨૬॥

ગોપસ્ત્રિયઃ વ્રતમનુષ્ઠાય તજ્જનિતં હર્ષમાવિષ્કુર્વન્તિ - કૂડારૈ વેલ્લુમ્ સીર્ - ઇતિ ।
હે શત્રુઞ્જય ગોપતે પ્રિય વિભો સ્તુત્વા વયં ત્વાં મુહુઃ
    પ્રપ્યેમાન્ પટહાન્ બહૂન્ બહુમતિં લપ્સ્યામહે ચોત્તમામ્ ।
વસ્ત્રાણ્યઙ્ગદકર્ણપત્રકટકાન્ ધૃત્વા તતઃ સઙ્ગતાઃ
    સ્વાદ્વન્નં ઘૃતદુગ્ધપૂરભરિતં ભોક્ષ્યામહે ચ ત્વયા ॥ ૨૭॥

પરિસમાપ્તવ્રતા ગોપિકાઃ ભગવતિ અપરાધક્ષમાં યાચન્તે - કરવૈકળ્ પિન્ ચેન્રુ - ઇતિ ।
ગોવૃત્ત્યૈવ હિ જીવતામહરહઃ ગોપાલકાનાં કુલે
    યેન પ્રાદુરભૂસ્ત્વમેતદુચિતં પુણ્યં સમૃદ્ધં હિ નઃ ।
અસ્માભિઃ પ્રિય કૃષ્ણ ગોપતનયેત્યાહૂયમાનોઽસકૃત્
    મન્યું મા કુરુ ચાસ્મદિષ્ટમખિલં સદ્યઃ પ્રયચ્છ પ્રભો ॥ ૨૮॥

એતાવતા ઐહિકસુખાનિ સમ્પ્રાર્થ્ય સમ્પ્રતિ સ્વાભિલષિતમામુષ્મિકસુખં
યાચન્તે - છિટ્રઞ્ચિરુકાલે - ઇતિ ।
કૃષ્ણ પ્રાતરિહાગતૈસ્તવ જનૈરાવેદ્યમાનં શ઼ૃણુ
    પ્રાગ્દત્તૈરિહ વાદ્યચામરમુખૈર્ન સ્યામ તુષ્ટાઃ પ્રભો ।
કિન્ત્વલ્પાન્ સહજાનપોહ્ય વિષયાન્ સાંસારિકાન્ સર્વદા
    કૈઙ્કર્યં કરવામ તેઽઙ્ઘ્રિકમલે કુર્યા દયાં નસ્તથા ॥ ૨૯॥

તિરુપ્પાવૈ ગ્રન્થપઠનસ્ય ફલં બ્રૂતે - વઙ્ગક્કડલ્ કડૈન્દ માધવનૈ- ઇતિ ।

ગોપ્યશ્ચન્દ્રસમાનચારુવદનાઃ સંસ્તુત્ય દામોદરં
પ્રાપ્તા યત્પટહાદિકં કૃતિમિમાં ગોદાખ્યદેવ્યા કૃતામ્ ।
ત્રિંશદ્દ્રાવિડપદ્યગુમ્ભનમયીં યે વા પઠન્ત્યાદરાત્
પદ્માકાન્તદયામવાપ્ય ભુવિ તે નિત્યં સુખં પ્રાપ્નુયુઃ ॥ ૩૦॥

ઇતિ તિરુપ્પાવૈ શ્લોકાઃ સમાપ્તાઃ ।

સમ્પ્રદાયવિદામત્ર વક્તવ્યં બહુ શિષ્યતે ।
વિશિષ્ટભાવવિસ્પષ્ટજ્ઞાનહેતુરિયં કૃતિઃ ॥

શ્રીવીરરાઘવાર્યાણાં ઉત્તમૂર્ચક્રવર્તિનામ્ ।
સર્વશાસ્ત્રપ્રવીણાનામન્તેવાસી હ્યયં જનઃ ॥

વરદાર્યગુરોઃ સૂનુઃ વાત્સ્યઃ શ્રીરામદેશિકઃ ।
વ્યતાનીત્ શ્લોકરૂપેણ ગોદાદેવ્યાઃ કૃતિં શુભામ્ ॥

શ્રીગોદાદેવ્યૈ નમઃ ।

Encoded by B Sreenivas bsmAchu at yahoo dot com
Proofread by B Sreenivas, PSA Easwaran psawaswaran

*tiruppAvai shlokAH with avatArikA*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*